नामांक Roll No.

Sl.No. :

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 20

No. of Printed Pages – 7

**VU–86–Vyak. Shastra**

# वरिष्ठ उपाध्याय परीक्षा, 2025

# VARISHTHA UPADHYAYA EXAMINATION, 2025

## व्याकरणशास्त्रम् (ऐच्छिकम्)

**समय** : 3 **घण्टे** 15 **मिनट**

**पूर्णांक** : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रस्योपरि नामांकः अनिवार्यतो लेखनीयः।

2) **सर्वे** प्रश्नाः अनिवार्याः।

3) सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि।

4) एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्र एव लेखनीयानि।

5) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतमाध्यमेन एव लेखनीयानि।

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

यहाँ से काटिए

## खण्डः – 'अ'

**1)** बहुविकल्पात्मक प्रश्नाः – **[18×1=18]**

i) सम्प्रसारणसंज्ञा विधायकं सूत्रमस्ति – **[1]**

अ) इग्यणः सम्प्रसारणम् | ब) इकोयणचि
स) वाह ऊठ् | द) सम्प्रसारणाच्च

ii) इदमो दस्य मादेशो विभक्तौ परे अनेन सूत्रेण भवति – **[1]**

अ) इदमो मः | ब) दश्च
स) इदोऽय् पुंसि | द) अनाप्यकः

iii) लिह्–शब्दस्य सप्तम्येकवचने रूपं भवति – **[1]**

अ) लिहः | ब) लिट्
स) लिहि | द) लिहाम्

iv) 'अनड्वान्' इत्यत्र 'सावनडुहः' इति सूत्रेण आगमो भवति – **[1]**

अ) आम् | ब) नुट्
स) अम् | द) नुम्

v) 'सुद्युभ्याम्' इत्यत्र पदान्ते दिवो वकारस्य उकारादेशो अनेन सूत्रेण भवति – **[1]**

अ) दिव औत् | ब) दिव उत्
स) षट् चतुर्भ्यश्च | द) वाह ऊठ्

vi) हलादौ विभक्तौ अष्टन आत्वमनेन सूत्रेण भवति – **[1]**

अ) नोपधायाः | ब) अष्टाभ्य औश्
स) अष्टन आ विभक्तौ | द) इतोऽत् सर्वनाम स्थाने

vii) 'पचन्ती' इत्यत्र नुमागमो भवति – **[1]**

अ) शप्श्यनोर्नित्यम् | ब) वा नपुंसकस्य
स) आच्छीनद्योर्नुम् | द) नपुंसकस्य झलचः

viii) 'अधिहरि' इत्यत्र अव्ययसंज्ञा भवति – [1]

अ) कृन्मेजन्तः
ब) अव्ययीभावश्च
स) स्वरादिनिपातमव्ययम्
द) अव्ययादाप्सुपः

ix) 'वयसि प्रथमे' इति सूत्रोदाहरणमस्ति – [1]

अ) युवतिः
ब) गौरी
स) नर्तकी
द) कुमारी

x) 'कालाध्वनोरत्यन्त संयोगे' इति सूत्रस्योदाहरणं नास्ति – [1]

अ) मासं कल्याणी
ब) मासमधीते
स) मासस्य द्विरधीते
द) मासं गुडधानाः

xi) क्रियासिद्धौ प्रकृष्टोपकारकं कारकं संज्ञां लभते – [1]

अ) सम्प्रदानम्
ब) कर्म
स) करणम्
द) अपादानम्

xii) 'ध्रुवमपायेऽपादानम्' इत्यत्र 'अपायः' इति पदस्यार्थोऽस्ति – [1]

अ) विश्लेषः
ब) नियतम्
स) संयोगः
द) साहचर्यम्

xiii) 'यतश्च निर्धारणम्' इति सूत्रेण निर्धारणे विभक्तिविधानं क्रियते – [1]

अ) तृतीया
ब) चतुर्थी
स) पञ्चमी
द) षष्ठीसप्तम्यौ

xiv) ई–प्रत्ययान्ताः धातुजशब्दाः कस्मिन् लिङ्गे प्रयुज्यन्ते? [1]

अ) पुल्लिङ्गे ब) पुं–नपुंसकलिङ्गे

स) नपुंसकलिङ्गे द) स्त्रीलिङ्गे

xv) 'घञबन्तः' इति सूत्रोदाहरणं नास्ति – [1]

अ) पाकः ब) त्यागः

स) यज्ञः द) करः

xvi) 'अवनिः' इत्यत्र लिङ्गमस्ति – [1]

अ) स्त्रीलिङ्गम् ब) पुंल्लिङ्गम्

स) नपुंसक लिङ्गम् द) पुं–नपुंसकलिङ्गम्

xvii) घ – प्रत्ययान्ताः अच् प्रत्ययान्ताश्च शब्दाः कस्मिन् लिङ्गे प्रयुक्ताः भवन्ति? [1]

अ) पुंल्लिङ्गे ब) स्त्रीलिङ्गे

स) नपुंसकलिङ्गे द) स्त्रीलिङ्गे पुल्लिङ्गे च

xviii) विंशत्यादयः आनवतेः संख्यावाचकाः शब्दाः कस्मिन् लिङ्गे प्रयुक्ताः भवन्ति? [1]

अ) पुल्लिङ्गे ब) स्त्रीलिङ्गे

स) नपुंसकलिङ्गे द) पुं–नपुंसकलिङ्गे

**2)** रिक्तस्थानानि प्रपूरयत – **[6×1=6]**

i) 'एकाचो बशो ...................।' [1]

ii) इदमो .................... यः स्यात् सौ। [1]

iii) 'अहन्' इत्यस्य ....................... स्यात् पदान्ते। [1]

iv) 'टिड्ढाणञ्द्वयसच् .....................।' [1]

v) 'प्रातिपदिकार्थ .................... प्रथमा।' [1]

vi) 'अप्सुमन्ससमा .......................।' [1]

**3)** अतिलघूत्तरात्मक प्रश्नाः – **[12×1=12]**

i) धात्वाधिकारे तिङ्भिन्नप्रत्ययस्य का संज्ञा भवति? **[1]**

ii) ञिति णिति च प्रत्यये नकारे च परे हन्तेर्हकारस्य कुत्वं केन सूत्रेण भवति? **[1]**

iii) 'उष्णिक्' इत्यत्र हकारस्य कुत्वं केन सूत्रेण भवति? **[1]**

iv) 'चतस्रः' इत्यत्र चतुर्स्थाने चतसृ–आदेशः केन सूत्रेण विधीयते। **[1]**

v) स्वनडुह् शब्दस्य प्रथमा विभक्तौ कानि रूपाणि भवन्ति। **[1]**

vi) 'कृत्वा' इत्यत्र अव्ययसंज्ञा केन सूत्रेण विधीयते। **[1]**

vii) 'कृन्मेजन्तः' इति सूत्रोदाहरणं लिखत। **[1]**

viii) 'युवतिः' इत्यत्र स्त्रीत्वविवक्षायां कः प्रत्ययोऽस्ति। **[1]**

ix) 'अकथितं च' इति सूत्रोदाहरणं लिखत। **[1]**

x) 'अक्ष्णा काणः' इत्यत्र तृतीयाविधायकं सूत्रं लिखत। **[1]**

xi) 'भावे ल्युडन्तः' इति सूत्रार्थं लिखत। **[1]**

xii) ऊङ् प्रत्ययान्ताः आप् प्रत्ययान्ताश्च शब्दाः कस्मिन् लिङ्गे प्रयुक्ताः भवन्ति? **[1]**

## खण्डः – 'ब'

लघूत्तरात्मक प्रश्नाः – **[10×2=20]**

**4)** 'चतुर्ण्णाम्' इति प्रयोगः साधनीयः। **[2]**

**5)** 'दादेर्धातोर्घः' इति सूत्रस्य सोदाहरणमर्थो लेख्यः। **[2]**

**6)** 'उपानत्सु' इति रूपं साधयत। **[2]**

**7)** 'अपो भि' इति सूत्रस्य सोदाहरणमर्थो लेख्यः। **[2]**

8) 'तुदन्ती' इति प्रयोगः साधनीयः। [2]

9) 'वा नपुंसकस्य' इति सूत्रस्य सोदाहरणमर्थो लेख्यः। [2]

10) 'स्वरादि निपातमव्ययम्' इति सूत्रस्य व्याख्या करणीया। [2]

11) 'कर्तुरीप्सिततमं कर्म' इति सूत्रस्य सोदाहरणमर्थो लेख्यः। [2]

12) 'षष्ठी शेषे' इति सूत्रस्य व्याख्या करणीया। [2]

13) 'दाराक्षतलाजासूनां बहुत्वं च' इति सूत्रस्य सोदाहरणमर्थो लेख्यः। [2]

## खण्डः – 'स'

दीर्घोत्तरीयाः प्रश्नाः –

14) अधोलिखितेषु प्रयोगद्वयं साधनीयम्। [1½+1½=3]

अ) अयम् | ब) चतुर्षु

स) पन्थाः | द) सः

15) अधोलिखितेषु द्वौ प्रयोगौ साधनीयौ – [1½+1½=3]

अ) अद्भिः | ब) आपः

स) उष्णिक्षु | द) द्यौः

16) अधोलिखितेषु रूपद्वयं साधनीयम् – [1½+1½=3]

अ) चत्वारि | ब) अहोभ्याम्

स) दीव्यन्ती | द) स्वनडुत्

17) अधोलिखितेषु द्वौ प्रयोगौ साधनीयौ – [1½+1½=3]

अ) सीमा | ब) इन्द्राणी

स) करभोरूः | द) अजा

## खण्डः – 'द'

निबन्धात्मक प्रश्नाः

**18)** अधोलिखितेषु कयोश्चिद् द्वयोः सिद्धिर्विधेया – **[2+2=4]**

अ) लिट्त्सु

ब) विश्वौहः

स) धीमान्

द) विदुषः

**19)** निम्नलिखितेषु कौचिद् द्वौ प्रयोगौ साधनीयौ – **[2+2=4]**

अ) गार्ग्यायणी

ब) शार्ङ्गरवी

स) दाक्षी

द) गौरी

**20)** अधोलिखितेषु प्रयोगद्वयं साधनीयम् – **[2+2=4]**

अ) हरये नमः

ब) ग्रामादायाति

स) कृष्णः

द) रामेण बाणेन हतो बाली

DO NOT WRITE ANYTHING HERE